# Shri Vivekanandajayagitam

# શ્રીવિવેકાનન્દજયગીતમ્

## Document Information

Text title : Shri Vivekanandajayagitam

File name : vivekAnandajayagItam.itx

Category : deities_misc, gurudev, rAmakRiShNa

Location : doc_deities_misc

Author : Kalipadatarkacharya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીવિવેકાનન્દજયગીતમ્

પુરાનન્તધ્વાન્તૈરુપહતશિવજ્ઞાનવિભવે
 ભવે નાના માર્ગૈરિહ સમુદિતે દૂષણશતે ।
હિતં તત્ત્વં ચેતું શિતમતિરગાદ્ યઃ પ્રતિદિશં
 નરેન્દ્રાખ્યઃ સોઽસૌ જયતિ-વિષયાપાસ્તહૃદયઃ ॥ ૧॥

તતો ગત્વા ગત્વા વિવિધમતમાશ્રિત્ય ભજતાં
 સમીપે સન્દેહાદનુપગતમુક્તિઃ કથમપિ ।
શ્રિતો યઃ સંસિદ્ધં દ્વિજમથ જહૌ સંશયમલં
 વિવેકાનન્દોઽસૌ જયતિ જઽઽતામુક્તહૃદયઃ ॥ ૨॥

તમેનં વિશ્વાસાદ્ ગુરુમકૃત દૃષ્ટાર્થમવશઃ
 સ ચાપ્યેનં મેને કુશલ શરણં ભારત-ભુવઃ ।
તદાદેશાદ્ધર્મં પ્રથયિતુમગાદ્ યોઽપરભુવં
 વિવેકાનન્દોઽસૌ જયતિ જનતાજાડ્યહરણઃ ॥ ૩॥

ગુરોરાશીર્વાદાદ્ સમનિજશક્તેરપિ બલાત્
 પ્રસાદાદાદ્યાયા વરુણદિશિ સંસત્ પરિગતાન્ ।
ક્ષણેન વ્યાખ્યાનૈરકૃત પરિમુગ્ધાન્મનસિ યો
 વિવેકાનન્દોઽસૌ જયતિ જયહેતુર્જનિભુવઃ ॥ ૪॥

તતઃ પ્રત્યાવૃત્તૌ હ્યભયમયમન્ત્રાન્ પ્રતિદિશં
 ચિતાલસ્યાન્ સઞ્જાગરયિતુમના ભારતજનાન્ ।
ય ઉચ્ચાર્યોદાત્તં વ્યઘટયમદીષાં ભયચયં
 વિવેકાનન્દોઽસૌ જયતિ ભયહૃદ્ભારતભુવઃ ॥ ૫॥

દિશન્ સેવાવૃત્તિં પરમહિતહેતું જનિમતા
 મનૈષીદ્ યો નિષ્ઠાં દિશિદિશિ ચ સેવાશ્રમગણાન્ ! ।
સુસન્તાનઃ શ્રેયઃ પ્રચયજનનઃ સર્વજગતાં
 વિવેકાનન્દોઽસૌ જયતિ તિમિરોત્પાતતપનઃ ॥ ૬॥

ઇતિ મહામહોપાધ્યાય શ્રીકાલીપદતર્કાચાર્યેણ વિરચિતં
“વિવેકાનન્દજયગીતમ્” સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Shri Vivekanandajayagitam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*